

# ॥ श्रीगदाधर स्तोत्रं – वराह पुराणम् ॥

## Sri Gadadhara Stotram – Varaha Puranam

The following is a rare hymn on **Lord Gadadhara (Lord Vishnu** in **Vishnupada Temple** in **Gaya)** taken from **Varaha Puranam** and **Chapter 7** titled **Raibhya Charita**. It is mentioned that one who goes to **Gaya** and recites this hymn achieves better fruits than those by offering **Pinda** to ancestors.

रैभ्य उवाच –

गदाधरं विबुध-जनैर्-अभिष्टुतं
धृतक्षमं क्षुधित-जनाऽर्ति-नाशनम् ।
शिवं विशालाऽसुर-सैन्य-मर्दनं
नमाम्यहं हत-सकलाऽशुभं स्मृतौ ॥ १ ॥

पुराण पूर्वं पुरुषं पुरुष्टुतं
पुरातनं विमलमलं नृणां गतिम् ।
त्रिविक्रमं हत धरणि बलोर्जितं
गदाधरं रहसि नमामि केशवम् ॥ २ ॥

विशुद्ध-भावं विभवैर् उपावृतं
श्रिया वृतं विगतमलं विचक्षणम् ।
क्षितीश्वरैर् अपगत किल्बिषैः स्तुतं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ३ ॥

सुराऽसुरैर् अर्चित पाद पङ्कजं
केयूर हाराङ्गद मौलि धारिणम् ।
अब्धौ शयानञ्-च रथाङ्ग-पाणिनं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ४ ॥

सितं कृते त्रैत-युगे ऽरुणं विभुं
तथा तृतीये नीलवर्णं अच्युतम् ।
कलौ-युगे ऽलि-प्रतिमं महेश्वरं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ५ ॥

बीजोद्भवो यः सृजते चतुर्मुखं
तथैव नारायण-रूपतो जगत् ।
प्रपालयेद् रुद्र वपुस् तथाऽन्त-कृद्
गदाधरो जयतु षडर्ध-मूर्तिमान् ॥ ६ ॥

सत्त्वं रजश् चैव तमो गुणास्
त्रयस्त्वेतेषु विश्वस्य समुद्भवः किल ।
स चैक एव त्रिविधो गदाधरो
दधातु धैर्यं मम धर्म-मोक्षयोः ॥ ७ ॥

संसार तोयार्णव दुःख तन्तुभिर्
वियोग नक्र क्रमणैः सुभीषणैः ।
मज्जन्तमुच्चैः सुतरां महाप्लवो
गदाधरो मां उदधौ तु योऽतरत् ॥ ८ ॥

स्वयं त्रिमूर्तिः स्वमिवात्मनात्मनि
स्वशक्तितश् चाऽण्डं इदं ससर्ज ह ।
तस्मिञ् जलोत्थासनं आप तैजसं
ससर्ज यस् तं प्रणतोऽस्मि भूधरम् ॥ ९ ॥

मत्स्यादि नामानि जगत्सु प्रश्नुते
सुरादि संरक्षणतो वृषाकपिः ।
मख-स्वरूपेण स सन्ततो विभुर्
गदाधरो मे विदधातु सद्गतिम् ॥ १० ॥

॥ फलश्रुतिः ॥

एतच्-च रैभ्य निर्दिष्टं स्तोत्रं विष्णोर् गदाभृतः ।
यः पठेत् स गयां गत्वा पिण्ड-दानाद्-विशिष्यते ॥ ११ ॥

---

**॥ इति वाराह-पुराणे रैभ्य-चरिते रैभ्य-कृत श्रीगदाधर स्तोत्रं सम्पूर्णम् ॥**